www.prepp.in

Prepp
Your Personal Exams Guide

Test Booklet Code & Serial No.
प्रश्नपत्रिका कोड व क्रमांक

**B**

# Paper-II
# SANSKRIT

**Signature and Name of Invigilator**

1. (Signature) ........................................

(Name) ................................................

2. (Signature) ........................................

(Name) ................................................

Seat No. | | | | | | |

(In figures as in Admit Card)

Seat No. ..............................................................

(In words)

OMR Sheet No. | | | | | | |

(To be filled by the Candidate)

## JUN - 04220

**Time Allowed : 2 Hours]** **[Maximum Marks : 200**

Number of Pages in this Booklet : **16** Number of Questions in this Booklet : **100**

**Instructions for the Candidates**

1. Write your Seat No. and OMR Sheet No. in the space provided on the top of this page.
2. This paper consists of **100** objective type questions. Each question will carry *two* marks. *All* questions of Paper II will be compulsory.
3. At the commencement of examination, the question booklet will be given to the student. In the first 5 minutes, you are requested to open the booklet and compulsorily examine it as follows :
   - (*i*) To have access to the Question Booklet, tear off the paper seal on the edge of this cover page. Do not accept a booklet without sticker-seal or open booklet.
   - (*ii*) Tally the number of pages and number of questions in the booklet with the information printed on the cover page. Faulty booklets due to missing pages/questions or questions repeated or not in serial order or any other discrepancy should not be accepted and correct booklet should be obtained from the invigilator within the period of 5 minutes. Afterwards, neither the Question Booklet will be replaced nor any extra time will be given. The same may please be noted.
   - (*iii*) After this verification is over, the OMR Sheet Number should be entered on this Test Booklet.
4. Each question has four alternative responses marked (A), (B), (C) and (D). You have to darken the circle as indicated below on the correct response against each item.
   **Example :** where (C) is the correct response.
   (A) (B) ● (D)
5. Your responses to the items are to be indicated in the **OMR Sheet given inside the Booklet only.** If you mark at any place other than in the circle in the OMR Sheet, it will not be evaluated.
6. Read instructions given inside carefully.
7. Rough Work is to be done at the end of this booklet.
8. If you write your Name, Seat Number, Phone Number or put any mark on any part of the OMR Sheet, except for the space allotted for the relevant entries, which may disclose your identity, or use abusive language or employ any other unfair means, you will render yourself liable to disqualification.
9. You have to return original OMR Sheet to the invigilator at the end of the examination compulsorily and must not carry it with you outside the Examination Hall. You are, however, allowed to carry the Test Booklet and duplicate copy of OMR Sheet on conclusion of examination.
10. Use only Blue/Black Ball point pen.
11. Use of any calculator or log table, etc., is prohibited.
12. There is no negative marking for incorrect answers.

**विद्यार्थ्यांसाठी महत्त्वाच्या सूचना**

1. परिक्षार्थींनी आपला आसन क्रमांक या पृष्ठावरील वरच्या कोपऱ्यात लिहावा. तसेच आपणांस दिलेल्या उत्तरपत्रिकेचा क्रमांक त्याखाली लिहावा.
2. सदर प्रश्नपत्रिकेत 100 बहुपर्यायी प्रश्न आहेत. प्रत्येक प्रश्नास **दोन** गुण आहेत. या प्रश्नपत्रिकेतील **सर्व** प्रश्न सोडविणे अनिवार्य आहे.
3. परीक्षा सुरू झाल्यावर विद्यार्थ्याला प्रश्नपत्रिका दिली जाईल. सुरुवातीच्या 5 मिनीटांमध्ये आपण सदर प्रश्नपत्रिका उघडून खालील बाबी अवश्य तपासून पहाव्यात.
   - (*i*) प्रश्नपत्रिका उघडण्यासाठी प्रश्नपत्रिकेवर लावलेले सील उघडावे. सील नसलेली किंवा सील उघडलेली प्रश्नपत्रिका स्विकारू नये.
   - (*ii*) पहिल्या पृष्ठावर नमूद केल्याप्रमाणे प्रश्नपत्रिकेची एकूण पृष्ठे तसेच प्रश्नपत्रिकेतील एकूण प्रश्नांची संख्या पडताळून पहावी. पृष्ठे कमी असलेली/कमी प्रश्न असलेली/प्रश्नांचा चुकीचा क्रम असलेली किंवा इतर त्रुटी असलेली सदोष प्रश्नपत्रिका सुरुवातीच्या 5 मिनिटातच पर्यवेक्षकाला परत देऊन दुसरी प्रश्नपत्रिका मागवून घ्यावी. त्यानंतर प्रश्नपत्रिका बदलून मिळणार नाही तसेच वेळही वाढवून मिळणार नाही याची कृपया विद्यार्थ्यांनी नोंद घ्यावी.
   - (*iii*) वरीलप्रमाणे सर्व पडताळून पाहिल्यानंतरच प्रश्नपत्रिकेवर ओ.एम.आर. उत्तरपत्रिकेचा नंबर लिहावा.
4. प्रत्येक प्रश्नासाठी (A), (B), (C) आणि (D) अशी चार विकल्प उत्तरे दिली आहेत. त्यातील योग्य उत्तराचा रकाना खाली दर्शविल्याप्रमाणे ठळकपणे काळा/निळा करावा.
   **उदा. :** जर (C) हे योग्य उत्तर असेल तर.
   (A) (B) ● (D)
5. या प्रश्नपत्रिकेतील प्रश्नांची उत्तरे **ओ.एम.आर. उत्तरपत्रिकेतच दर्शवावीत.** इतर ठिकाणी लिहिलेली उत्तरे तपासली जाणार नाहीत.
6. आत दिलेल्या सूचना काळजीपूर्वक वाचाव्यात.
7. प्रश्नपत्रिकेच्या शेवटी जोडलेल्या कोऱ्या पानावरच कच्चे काम करावे.
8. जर आपण ओ.एम.आर. वर नमूद केलेल्या ठिकाणा व्यतिरीक्त इतर कोठेही नाव, आसन क्रमांक, फोन नंबर किंवा ओळख पटेल अशी कोणतीही खूण केलेली आढळून आल्यास अथवा असभ्य भाषेचा वापर किंवा इतर गैरमार्गांचा अवलंब केल्यास विद्यार्थ्याला परीक्षेस अपात्र ठरविण्यात येईल.
9. परीक्षा संपल्यानंतर विद्यार्थ्याने मूळ ओ.एम.आर. उत्तरपत्रिका पर्यवेक्षकांकडे परत करणे आवश्यक आहे. तथापि, प्रश्नपत्रिका व ओ.एम.आर. उत्तरपत्रिकेची द्वितीय प्रत आपल्याबरोबर नेण्यास विद्यार्थ्यांना परवानगी आहे.
10. फक्त निळ्या किंवा काळ्या बॉल पेनचाच वापर करावा.
11. कॅलक्युलेटर किंवा लॉग टेबल वापरण्यास परवानगी नाही.
12. चुकीच्या उत्तरासाठी गुण कपात केली जाणार नाही.

www.prepp.in

Prepp
Your Personal Exams Guide

www.prepp.in

Prepp
Your Personal Exams Guide



# Sanskrit
## Paper II
# संस्कृत
## प्रश्नपत्रिका II

**Time Allowed : 120 Minutes]** **[Maximum Marks : 200**

**Note :** This Paper contains **Hundred (100)** multiple choice questions. Each question carrying **Two (2)** marks. Attempt *All* questions.

**सूचना :** या प्रश्नपत्रिकेत एकूण **शंभर (100)** बहुपर्यायी प्रश्न दिलेले आहेत. प्रत्येक प्रश्नाला **दोन (2)** गुण आहेत. **सर्व** प्रश्न सोडवा.

1. 'इति विज्ञायते' इति वाक्यांशद्वारा यास्कः
   (A) वेदवाक्यमुद्धरति
   (B) शास्त्रवाक्यमुद्धरति
   (C) परिषन्निर्णयं शंसति
   (D) स्वमतं अभिव्यनक्ति

2. अधस्तनवाक्यानां सत्यासत्यपर्यायेषु समीचीनं विचिनुत :
   (*a*) निरुक्तमन्तरेण मन्त्रेषु अर्थप्रत्ययो भवति
   (*b*) सत्वप्रधानमाख्यातम्
   (*c*) भावप्रधानानि नामानि
   (*d*) निपाताः उच्चावचेष्वर्थेषु निपतन्ति
   (A) असत्यम्, असत्यम्, असत्यम्, सत्यम्
   (B) सत्यम्, असत्यम्, सत्यम्, असत्यम्
   (C) असत्यम्, सत्यम्, सत्यम्, असत्यम्
   (D) सत्यम्, सत्यम्, सत्यम्, सत्यम्

3. नामान्याख्यातजानीति सिद्धान्तः केषाम् ?
   (A) वैयाकरणानाम्
   (B) नैरुक्तानाम्
   (C) याज्ञिकानाम्
   (D) ऐतिहासिकानाम्

4. असङ्गतं दूरीकुरुत :
   (A) जायते
   (B) अस्ति
   (C) विपरिणमते
   (D) भावयति

5. अधोनिर्दिष्टानां वाक्यानां सत्यासत्यपर्यायेषु समीचीनं विचिनुत :
   (*a*) तत्त्वा यामीति वर्णलोपस्योदाहरणम्
   (*b*) प्रत्तमित्यस्मिन् उपधाविकारो दृश्यते
   (*c*) दातिर्लवनार्थे प्राच्येषु भाषन्ते
   (*d*) दण्डयः इति सामासिकं पदम्
   (A) सत्यम्, असत्यम्, सत्यम्, असत्यम्
   (B) सत्यम्, सत्यम्, असत्यम्, सत्यम्
   (C) असत्यम्, असत्यम्, सत्यम्, सत्यम्
   (D) असत्यम्, सत्यम्, सत्यम, असत्यम्

6. 'इन्द्रियनित्यं वचनम्' इति सिद्धान्तोऽयं कस्य वर्तते ?
   (A) शाकटायनस्य
   (B) औडुम्बरायणस्य
   (C) गार्ग्यस्य
   (D) यास्कस्य

www.prepp.in

Prepp
Your Personal Exams Guide



7. 'नूनम्' इति निपात: भाषायां वर्तते :
(A) उपमार्थीय:
(B) प्रतिषेधार्थीय:
(C) विचिकित्सार्थीय:
(D) पदपूरण:

8. षड्वेदाङ्गानां वेदस्य अङ्गविशेषरूपतामालक्ष्य समुचितानि युग्मानि कस्मिन् विकल्पे सन्ति ?

| | | | |
|---|---|---|---|
| (*a*) | छन्द: | (*p*) | हस्तौ |
| (*b*) | निरुक्तम् | (*q*) | पादौ |
| (*c*) | शिक्षा | (*r*) | श्रोत्रम् |
| (*d*) | कल्प: | (*s*) | घ्राणम् |

| | | | | |
|---|---|---|---|---|
| (A) | *aq* | *br* | *cs* | *dp* |
| (B) | *ap* | *bq* | *cr* | *ds* |
| (C) | *ar* | *bs* | *cp* | *dq* |
| (D) | *as* | *bp* | *cq* | *dr* |

9. समूहाद् असंगतं दूरीकुरुत :
(A) ऊषर:
(B) सुषिर:
(C) मुष्कर:
(D) दन्तुर:

10. रिक्तस्थानं पूरयत :
.................. इतीदं रूपं नखमुखात्संज्ञायामिति सूत्रेण सिध्यते।
(A) ताम्रमुखी
(B) प्राङ्मुखी
(C) शूर्पणखा
(D) शूर्पनखी

11. युग्मपर्यायेषु उचितं विचिनुत :

| | | | |
|---|---|---|---|
| (*a*) | अकार: | (*p*) | दन्त्य: |
| (*b*) | इकार: | (*q*) | कण्ठ्य: |
| (*c*) | ऋकार: | (*r*) | तालव्य: |
| (*d*) | ऌकार: | (*s*) | मूर्धन्य: |

| | | | | |
|---|---|---|---|---|
| (A) | *aq* | *br* | *cp* | *ds* |
| (B) | *aq* | *bp* | *cs* | *dr* |
| (C) | *aq* | *br* | *cs* | *dp* |
| (D) | *ar* | *bs* | *cp* | *dq* |

12. समूहात् असंगतं दूरीकुरुत :
(A) क्
(B) द्
(C) ज्
(D) ठ्

13. स्तुत्य: इत्यत्र कस्माद्धातो: क: प्रत्यय: ?
(A) स्तुधातो: त्यक्प्रत्यय:
(B) स्तुधातो: क्यप्प्रत्यय:
(C) स्तुधातो: यत्प्रत्यय:
(D) स्तुधातो: ण्यत्प्रत्यय:

14. 'पुरुषव्याघ्र' इत्ययं समास: केन सूत्रेण विधीयते ?
(A) विशेषणं विशेष्येण बहुलम्
(B) उपमितं व्याघ्रादिभि: सामान्याप्रयोगे
(C) उपमानानि सामान्यवचनै:
(D) वृन्दारकनागकुञ्जरै: पूज्यमानम्

www.prepp.in

Prepp
Your Personal Exams Guide



15. अधस्तनयुग्मपर्यायेषु समीचीनं विचिनुत :

| | |
|---|---|
| (*a*) जन्मादयो विकाराः षड् | (*p*) भेदवानिव जायते |
| (*b*) भेदानां बहुमार्गत्वम् | (*q*) भावभेदस्य योनयः |
| (*c*) तत्त्वावबोधः शब्दानाम् | (*r*) नास्ति व्याकरणादृते |
| (*d*) अक्रमः क्रमरूपेण | (*s*) कर्मण्येकत्र चाङ्गता |

(A) *as* *bp* *cq* *dr*

(B) *ap* *bq* *cr* *ds*

(C) *aq* *bs* *cr* *dp*

(D) *ar* *bq* *cs* *dp*

16. 'संहिता' इति संज्ञा केन सूत्रेण भवति ?

(A) संहितशफलक्षणवामादेश्च

(B) परः सन्निकर्षः संहिता

(C) संहितायाम्

(D) तयोर्खावचि संहितायाम्

17. चन्द्रकेतुः कः ?

(A) भरतस्य पुत्रः

(B) लक्ष्मणस्य पुत्रः

(C) कर्णस्य पुत्रः

(D) दुर्योधनस्य पुत्रः

18. अधस्तनेषु असंगतं दूरीकुरुत :

(A) दुर्योधनः

(B) युधिष्ठिरः

(C) भीष्मः

(D) जनकः

19. अधस्तनवर्गयोः युग्मपर्यायेषु समीचीनं चिनुत :

| | |
|---|---|
| (*a*) सीता | (*p*) याज्ञसेनी |
| (*b*) द्रौपदी | (*q*) सौमित्रः |
| (*c*) लक्ष्मणः | (*r*) वैदेही |
| (*d*) अर्जुनः | (*s*) कौन्तेयः |

(A) *ar* *bp* *cs* *dq*

(B) *ap* *br* *cs* *dq*

(C) *ap* *br* *cq* *ds*

(D) *ar* *bp* *cq* *ds*

20. अयं पुराणलक्षणेषु नान्तर्भवति :

(A) सर्गः

(B) प्रतिसर्गः

(C) वंशः

(D) धर्मः

21. 'युद्धकाण्डम्' कस्मिन् ग्रन्थे अन्तर्भूतम् ?

(A) महाभारते

(B) रामायणे

(C) अग्निपुराणे

(D) वायुपुराणे

22. रामायणस्य किष्किन्धाकाण्डे किं वर्णितम् ?

(A) रामस्य बाललीलाः

(B) रामस्य चित्रकूटे वास्तव्यम्

(C) रामसुग्रीवयोः मैत्री

(D) रामराज्याभिषेकः

23. असंगतं दूरीकुरुत :

(A) जयः

(B) शतसाहस्री संहिता

(C) महाभारतम्

(D) रामायणम्

Prepp Your Personal Exam Guide

24. अधस्तनेषु पर्यायेषु समीचीनं युग्मपर्यायं विचिनुत :

| | | | |
|---|---|---|---|
| (*a*) | पार्थसारथिः | (*p*) | भीष्मः |
| (*b*) | गाङ्गेयः | (*q*) | कृष्णः |
| (*c*) | दाशरथिः | (*r*) | कर्णः |
| (*d*) | राधेयः | (*s*) | रामः |

(A) *aq* *bp* *cs* *dr*

(B) *ap* *bq* *cr* *ds*

(C) *ar* *bs* *cp* *dq*

(D) *as* *br* *cq* *dp*

25. समाख्या कतिविधा ?

(A) द्विविधा

(B) त्रिविधा

(C) चतुर्विधा

(D) पञ्चविधा

26. अधोनिर्दिष्टेषु सत्यासत्यपर्यायेषु योग्यं विचिनुत।

व्याप्यो नाम –

(*a*) व्यापकाश्रयः

(*b*) व्याप्त्याश्रयः

(*c*) साध्याश्रयः

(*d*) पक्षाश्रयः

(A) असत्यम्, असत्यम्, सत्यम्, असत्यम्

(B) असत्यम्, सत्यम्, असत्यम्, असत्यम्

(C) सत्यम्, असत्यम्, असत्यम्, असत्यम्

(D) असत्यम्, असत्यम्, असत्यम्, असत्यम्

27. अधोनिर्दिष्टेषु सत्यासत्यपर्यायेषु योग्यं विचिनुत।

पक्षता नाम –

(*a*) सिषाधयिषाविरहविशिष्टसिद्ध्यभावः

(*b*) सिषाधयिषाविरहाविशिष्टसिद्ध्यभावः

(*c*) सिषाधयिषा मात्रा

(*d*) साध्यसन्देहः

(A) सत्यम्, असत्यम्, असत्यम्, असत्यम्

(B) असत्यम्, सत्यम्, असत्यम्, असत्यम्

(C) असत्यम्, असत्यम्, सत्यम्, असत्यम्

(D) असत्यम्, असत्यम्, असत्यम्, सत्यम्

28. अधोनिर्दिष्टेषु युग्मपर्यायेषु योग्यं विचिनुत :

| | | | |
|---|---|---|---|
| (*a*) | साक्षात्कारिप्रमाकरणम् | (*p*) | अनुमानम् |
| (*b*) | नामजात्यादियोजनात्मकम् | (*q*) | व्याप्तिः |
| (*c*) | लिङ्गपरामर्शः | (*r*) | सविल्पकम् |
| (*d*) | स्वाभाविकः सम्बन्धः | (*s*) | प्रत्यक्षम् |

(A) *ar* *bs* *cq* *dp*

(B) *aq* *bp* *cs* *dr*

(C) *ap* *bq* *cr* *ds*

(D) *as* *br* *cp* *dq*

29. ब्रह्मसूत्रशाङ्करभाष्ये प्रथमसूत्रे 'अथ' शब्दः कस्मिन्नर्थे प्रयुक्तः ?

(A) मङ्गलार्थे

(B) आरम्भार्थे

(C) अधिकारार्थे

(D) आनन्तर्यार्थे

www.prepp.in

Prepp
Your Personal Exams Guide



30. योग्यं सत्यासत्यपर्यायं विचिनुत :

(*a*) स आस्रवः। शुभः पुण्यस्य। अशुभः पापस्य

(*b*) मिथ्यादर्शनं चतुर्विधम्

(*c*) प्रिया वाचं यमानां नो भाषासमितिरुच्यते

(*d*) घटोऽस्तीति च वक्तव्यं सन्नेव हि यतो घटः

(A) सत्यम्, असत्यम्, असत्यम्, असत्यम्

(B) असत्यम्, सत्यम्, सत्यम्, सत्यम्

(C) सत्यम्, असत्यम्, असत्यम्, सत्यम्

(D) असत्यम्, सत्यम्, सत्यम्, असत्यम्

31. रिक्तस्थानं पूरयत –

मूलप्रकृतिः ............... ।

(A) विकृतिः

(B) अविकृतिः

(C) सुकृतिः

(D) कृत्यकृतिः

32. कः पुरुषस्य दर्शनार्थं प्रधानस्य च कैवल्यार्थम् ?

(A) प्रलयः

(B) उदयः

(C) सर्गः

(D) नाशः

33. वेदान्तसारे वर्णिताः अनुबन्धाः कति ?

(A) चत्वारः

(B) त्रयः

(C) पञ्च

(D) सप्त

34. रिक्तस्थानं पूरयत—

वेदान्तो नाम उपनिषत्प्रमाणं तदुपकारीणि च ..................

(A) धर्मसूत्रादीनि

(B) शारीरकसूत्रादीनि

(C) कल्पसूत्रादीनि

(D) वेदाङ्गानि

35. पातंजलयोगसूत्रे तथाजातीयकाः संस्काराः काभिः क्रियन्ते ?

(A) वृत्तिभिः

(B) राजभिः

(C) मालाभिः

(D) पशुभिः

36. वेदान्तसारे किं नाम ब्रह्म ?

(A) अवस्तु

(B) सद्वस्तु

(C) समस्तवस्तु

(D) वस्तु

www.prepp.in

Prepp
Your Personal Exams Guide



37. पातञ्जलयोगसूत्रे कर्माणि कानि ?

(A) साध्वसाधूनि

(B) सुखदु:खानि

(C) सुष्टदुष्टानि

(D) कुशलाकुशलानि

38. उचितं युग्मपर्यायं विचिनुत :

| | | | |
|---|---|---|---|
| (*a*) | मनसः योग्यता | (*p*) | समाधिजाः |
| (*b*) | सिद्धयः | (*q*) | धारणा |
| (*c*) | स्थिरसुखम् | (*r*) | स्वरूपप्रतिष्ठा |
| (*d*) | कैवल्यम् | (*s*) | आसनम् |

(A) *as* *br* *cq* *dp*

(B) *ap* *bq* *cr* *ds*

(C) *ar* *bs* *cp* *dq*

(D) *aq* *bp* *cs* *dr*

39. कौटिलीयार्थशास्त्रानुसारं कः राजा पूज्यः ?

(A) तीक्ष्णदण्डः

(B) मृदुदण्डः

(C) यथार्हदण्डः

(D) दण्डिदण्डः

40. कः राजा कामाद् विनष्टः इति कौटिलीये अर्थशास्त्रे वर्णितम् ?

(A) दाण्डक्यः भोजः

(B) करालः वैदेहः

(C) जनमेजयः

(D) तालजङ्घः

41. मनुस्मृत्यनुसारं मनः किं विकुरुते ?

(A) सृष्टिम्

(B) आकाशम्

(C) वायुम्

(D) जलम्

42. मनुस्मृतिमनुसृत्य, एकाग्रमासीनं मनुमभिगम्य के वचनमब्रुवन् ?

(A) मानवाः

(B) राक्षसाः

(C) महर्षयः

(D) देवताः

43. याज्ञवल्क्यस्मृत्यनुसारं, कीदृशः नृपः व्यवहारान् पश्येत् ?

(A) धर्मशास्त्रविवर्जितः

(B) क्रोधलोभविवर्जितः

(C) विद्वद्ब्राह्मणविवर्जितः

(D) प्रजापालनविवर्जितः

44. याज्ञवल्क्यस्मृत्यनुसारं कस्मादागमोऽभ्यधिकः ?

(A) योगात्

(B) शास्त्रात्

(C) धर्मात्

(D) भोगात्

Prepp Your Personal Exam Guide

www.prepp.in



45. अधस्तनवर्गयो: युग्मपर्यायेषु समीचीनं विचिनुत :

| | | | |
|---|---|---|---|
| (*a*) | कादम्बरी | (*p*) | अजविलाप: |
| (*b*) | नैषधीयचरितम् | (*q*) | रतिविलाप: |
| (*c*) | कुमारसंभवम् | (*r*) | अच्छोदवर्णनम् |
| (*d*) | रघुवंशम् | (*s*) | हंसदौत्यम् |

| | | | | |
|---|---|---|---|---|
| (A) | *ar* | *bs* | *cp* | *dq* |
| (B) | *aq* | *bs* | *cr* | *dp* |
| (C) | *ar* | *bp* | *cq* | *ds* |
| (D) | *ar* | *bs* | *cq* | *dp* |

46. हर्षचरितानुसारेण हर्षस्य पितु: नाम आसीत् :

(A) प्रभाकरवर्धन:

(B) यशोवर्धन:

(C) राजवर्धन:

(D) पुण्यवर्धन:

47. रिक्तस्थानं पूरयत।

............. वामनावतारस्य स्तवनेन आरभ्यते।

(A) रत्नावली

(B) दशकुमारचरितम्

(C) स्वप्नवासवदत्तम्

(D) मुद्राराक्षसम्

48. वागर्थाविव सम्पृक्तौ कौ ?

(A) रमानारायणौ

(B) पार्वतीपरमेश्वरौ

(C) सीतारामौ

(D) देवीदेवौ

49. 'सर्वशुक्ला सरस्वती' इत्युक्ति: कस्य ?

(A) कालिदासस्य

(B) विज्जकाया:

(C) दण्डिन:

(D) राजशेखरस्य

50. उपरूपकाणां कति भेदास्सन्ति ?

(A) दश

(B) द्वादश

(C) अष्टादश

(D) विंशति:

51. विदूषक गौतम: कस्मिन् नाटके दृश्यते ?

(A) प्रतिमायाम्

(B) मालविकाग्निमित्रे

(C) अभिज्ञानशाकुन्तले

(D) स्वप्नवासवदत्ते

52. 'भावस्थिराणि जननान्तरसौहृदानि'' इत्युक्ति: कस्मिन् नाटके वर्तते ?

(A) उत्तररामचरिते

(B) रत्नावल्याम्

(C) अभिज्ञानशाकुन्तले

(D) मुद्राराक्षसे

53. 'मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गति:' इत्येषा पङ्क्ति: कस्मिन् काव्ये वर्तते ?

(A) कुमारसम्भवे

(B) सौन्दरनन्दे

(C) किरातार्जुनीये

(D) रघुवंशे

54. नलचम्पूकाव्यं कस्य कृतिः ?
(A) श्रीहर्षस्य
(B) त्रिविक्रमभट्टस्य
(C) भीमकस्य
(D) कालिदासस्य

55. समूहादसंगतं दूरीकुरुत :
(A) अभिज्ञानशाकुन्तलम्
(B) स्वप्नवासवदत्तम्
(C) उत्तररामचरितम्
(D) मृच्छकटिकम्

56. अधोनिर्दिष्टेषु सत्यासत्यपर्यायेषु योग्यं विचिनुत :
(*a*) अच्छोदसरोवरवर्णनं कादम्बर्यां विद्यते
(*b*) कादम्बर्याः नायिका महाश्वेता नास्ति
(*c*) कादम्बर्याः रचना वैदर्भीरीतौ विरचिता
(*d*) कादम्बर्याः प्रधानो रसः वीरः

| | | | | |
|---|---|---|---|---|
| (A) | सत्यम् | असत्यम् | सत्यम् | असत्यम् |
| (B) | सत्यम् | असत्यम् | असत्यम् | असत्यम् |
| (C) | सत्यम् | सत्यम् | असत्यम् | असत्यम् |
| (D) | सत्यम् | असत्यम् | असत्यम् | सत्यम् |

57. अधोनिर्दिष्टेषु समीचीनं युग्मपर्यायं विचिनुत :

| | | | |
|---|---|---|---|
| (*a*) | श्री. भा. वर्णेकरः | (*p*) | वाल्मिकि प्रतिभा |
| (*b*) | व्ही. राघवन् महोदयः | (*q*) | शंकरजीवनाख्यानम् |
| (*c*) | क्षमाराव महाभागा | (*r*) | शिवराजविजयः |
| (*d*) | अम्बिकादत्त व्यासः | (*s*) | शिवराज्योदयम् |

| | | | | |
|---|---|---|---|---|
| (A) | *ap* | *bs* | *cr* | *dq* |
| (B) | *aq* | *br* | *cs* | *dp* |
| (C) | *as* | *bp* | *cq* | *dr* |
| (D) | *ar* | *bq* | *cp* | *ds* |

58. 'गुणागुणानुबन्धित्वात्तस्य सप्रसवा इव'' इति श्लोकार्थः कस्मिन् महाकाव्ये वर्तते ?
(A) कुमारसंभवे
(B) रघुवंशे
(C) नैषधीयचरिते
(D) शिशुपालवधे

59. नाट्यशास्त्रस्य टीका का ?
(A) भामतिः
(B) अभिनवभारती
(C) मल्लिनाथी
(D) मिताक्षरा

60. समस्तवस्तुविषयेति नामके रूपकालङ्कार भेदे किं 'वस्तु' शब्दबोध्यमस्ति ?
(A) उपमेयम्
(B) उपमानम्
(C) अभेदारोपणम्
(D) साङ्गम्

61. 'कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभा' इति उक्तिः विश्वनाथेन कस्मात् गृहीता ?
(A) अग्निपुराणात्
(B) विष्णुपुराणात्
(C) नाट्यशास्त्रात्
(D) विष्णुधर्मोत्तरपुराणात्

62. साहित्यदर्पणे 'अविरुद्धा विरुद्धा वा यं तिरोधातुम–क्षमा:' इत्यत्र 'अविरुद्धा, विरुद्धा' चेत्येतयो: विशेषणपदयो: विशेष्यपदमस्ति :
(A) विभावा:
(B) अनुभावा:
(C) भावा:
(D) रसदोषा:

63. 'श्वेतो धावति' इत्यत्र कस्मिन् पदे लक्षणा अस्ति ?
(A) श्वेत:
(B) धावति
(C) उभयत्र
(D) न कस्मिन्नपि पदे

64. 'अखण्डस्व प्रकाशानन्दचिन्मय: .......... रस:' इत्यत्र 'मयट्' प्रत्यय: अस्ति :
(A) विकारार्थे
(B) प्राचुर्यार्थे
(C) स्वरूपार्थे
(D) अल्पार्थे

65. शाब्दीभावनाया: साधनांशं किमन्वेति ?
(A) धर्मज्ञानम्
(B) अधर्मज्ञानम्
(C) लिङादिज्ञानम्
(D) अर्थज्ञानम्

66. विनियोगविधौ प्रकरणमिति प्रमाणं कतिविधम् ?
(A) पञ्चविधम्
(B) चतुर्विधम्
(C) त्रिविधम्
(D) द्विविधम्

67. अधोनिर्दिष्टेषु अयं न उपमावाचक: शब्द: :
(A) इव
(B) एवम्
(C) वत्
(D) तुल्य:

68. काव्यप्रकाशमते अधोनिर्दिष्टेषु इदं काव्यस्य प्रयोजनं नास्ति :
(A) यश:
(B) अर्थ:
(C) शिवेतरक्षति:
(D) सामर्थ्यम्

69. अधोनिर्दिष्टेषु सत्यासत्यपर्यायेषु समीचीनं विचिनुत :
(*a*) दुर्मुखस्य व्यक्तिचित्रणं स्वप्नवासवदत्ते दृश्यते
(*b*) अभिज्ञानशाकुन्तले चतुर्थोऽङ्क: प्रसिद्ध:
(*c*) उत्तररामचरिते पञ्चवटीवर्णनं विद्यते
(*d*) मृच्छकटिके शकारस्य पात्रं नास्ति
(A) सत्यम् असत्यम् सत्यम् असत्यम्
(B) असत्यम् सत्यम् सत्यम् असत्यम्
(C) असत्यम् सत्यम् असत्यम् असत्यम्
(D) असत्यम् असत्यम् सत्यम् असत्यम्

Prepp
Your Personal Exams Guide



70. अधोनिर्दिष्टेषु सत्यासत्यपर्यायेषु समीचीनं विचिनुत :

(*a*) काव्यप्रकाशे अलङ्कार विवेचनं नास्ति

(*b*) साहित्यदर्पणे काव्यलक्षणानां खण्डनं कृतमस्ति

(*c*) आनंदवर्धनः रससंप्रदायस्य पुरस्कर्ता

(*d*) औचित्यविचारचर्चा इति ग्रंथस्य कर्ता विश्वनाथः

| | | | | |
|---|---|---|---|---|
| (A) | असत्यम् | सत्यम् | असत्यम् | सत्यम् |
| (B) | असत्यम् | असत्यम् | असत्यम् | असत्यम् |
| (C) | असत्यम् | सत्यम् | असत्यम् | असत्यम् |
| (D) | सत्यम् | सत्यम् | सत्यम् | सत्यम् |

71. योग्यं युग्मपर्यायं विचिनुत :

| | | | |
|---|---|---|---|
| (*a*) | राजवाहनः | (*p*) | कादम्बरी |
| (*b*) | पुण्डरीकः | (*q*) | शाकुन्तलम् |
| (*c*) | अग्निवर्णः | (*r*) | दशकुमारचरितम् |
| (*d*) | शारद्वतः | (*s*) | रघुवंशः |

| | | | | |
|---|---|---|---|---|
| (A) | *ap* | *bq* | *cr* | *ds* |
| (B) | *ar* | *bp* | *cs* | *dq* |
| (C) | *as* | *br* | *cq* | *dp* |
| (D) | *aq* | *bs* | *cp* | *dr* |

72. अतनीत् इति कस्य लकारस्य रूपम् ?

(A) लङ्लकारस्य

(B) लृङ्लकारस्य

(C) लेटलकारस्य

(D) लुङ्लकारस्य

73. रिक्तस्थानं पूरयत –

लक्षणा तेन ..............।

(A) त्रिविधा

(B) षड्विधा

(C) अष्टविधा

(D) दशविधा

74. काव्यप्रकाशे 'यः कौमारहरः' इति उदाहरणं किमर्थमुद्धृतम् ?

(A) काव्यदोषविशदीकरणार्थम्

(B) काव्यगुणविशदीकरणार्थम्

(C) रूपकालंकारस्पष्टीकरणार्थम्

(D) 'अनलंकृती' शब्दस्य स्पष्टीकरणार्थम्

75. विश्वनाथेन गोबलीवर्दन्यायेन कयोः भेदः स्वीकृतः ?

(A) अनुभावसात्त्विकभावयोः

(B) रसभावयोः

(C) स्थायिव्यभिचारभावयोः

(D) आलम्बन-उद्दीपन विभावयोः

76. रिक्तस्थानं पूरयत –

ब्राह्मी लिपिवाचनं ................ इत्यनेन कृतम्।

(A) जेम्स फर्ग्युसन

(B) जेम्स प्रिन्सेप

(C) जेम्स बर्जेस

(D) अलेक्झांडर कनिंगहॅम

Prepp
Your Personal Exams Guide



77. 'देवानं पिय पियदस्सी' इति विशेषणं कस्य ?
    (A) राज्ञः अशोकस्य
    (B) रुद्रदाम्नः
    (C) मिहिरकुलस्य
    (D) समुद्रगुप्तस्य

78. आर्यावृत्ते प्रथमतृतीयपादयोः कति मात्राः भवन्ति ?
    (A) एकादश
    (B) द्वादश
    (C) त्रयोदश
    (D) चतुर्दश

79. रिक्तस्थानं पूरयत –
    अलाहाबाद प्रशस्त्यनुसारं समुद्रगुप्तः ............ आसीत्।
    (A) लिच्छविदौहित्रः
    (B) मागधदौहित्रः
    (C) नागनिकापुत्रः
    (D) ध्रुवदेवीपुत्रः

80. 'ऐहोळेप्रशस्तिः' इत्याख्यः प्रसिद्ध शिलालेखः कस्मिन् मन्दिरे वर्तते ?
    (A) शिवमन्दिरे
    (B) गणेशमन्दिरे
    (C) जिनमन्दिरे
    (D) बुद्धमन्दिरे

81. पुरुषसूक्ते मनसः कस्य उत्पत्तिरुक्ता ?
    (A) वायोः
    (B) चन्द्रमसः
    (C) अग्नेः
    (D) सूर्यस्य

82. ताण्ड्य-महाब्राह्मणग्रन्थः केन वेदेन सम्बद्धः अस्ति ?
    (A) सामवेदेन
    (B) अथर्ववेदेन
    (C) यजुर्वेदेन
    (D) ऋग्वेदेन

83. 'राजन्तमध्वराणां गोपामृतस्य ............ स्वे दमे' मन्त्रेऽस्मिन् कस्याः देवतायाः स्तुतिरस्ति ?
    (A) इन्द्रस्य
    (B) सोमस्य
    (C) वरुणस्य
    (D) अग्नेः

84. पृथिवीसूक्त पठित मन्त्रांशे 'सत्यं बृहद् ऋतमुग्रम्' इत्यत्र 'ऋतम्' इति शब्दस्यार्थोऽस्ति :
    (A) सत्यम्
    (B) वेदज्ञानम्
    (C) शाश्वतनियमः
    (D) असत्यम्

www.prepp.in

Prepp
Your Personal Exams Guide



85. ऋग्वेदस्य कस्मिन्मण्डले प्रथमं सूक्तम् अग्नि-देवताकं नास्ति ?
   (A) शतर्चिमण्डले
   (B) दशमे मण्डले
   (C) आत्रेये मण्डले
   (D) पवमानमण्डले

86. ऋग्वेदे अधोरेखाङ्कितः स्वरः भवति :
   (A) अनुदात्तः
   (B) स्वरितः
   (C) उदात्तः
   (D) प्रचयः

87. असङ्गतं रूपं दूरीकुरुत :
   (A) द्यावापृथिवी
   (B) अश्विना
   (C) वक्षति
   (D) लिखति

88. असंगतं दूरीकुरुत :
   (A) अग्निहोत्रस्थाली
   (B) पर्णमयी जुहू
   (C) पुटपाकपात्रम्
   (D) मेक्षणम्

89. ऋग्वेदस्य प्रथमः भाष्यकारः अस्ति :
   (A) स्कन्दस्वामी
   (B) सायणः
   (C) महीधरः
   (D) वेंकटमाधवः

90. वाक्सूक्तस्य 'शखे हन्तवा उ' इति वाक्यांशे 'हन्तवा' इति शब्दस्य अर्थः अस्ति :
   (A) हननसामर्थ्यम्
   (B) हन्तुम्
   (C) हाहाकारः
   (D) हन्त। हन्त।

91. कस्य वेदस्यारण्यकं नोपलभ्यते ?
   (A) ऋग्वेदस्य
   (B) सामवेदस्य
   (C) अथर्ववेदस्य
   (D) यजुर्वेदस्य

92. होता कस्य वेदस्य ऋत्विक् ?
   (A) अथर्ववेदस्य
   (B) ऋग्वेदस्य
   (C) सामवेदस्य
   (D) यजुर्वेदस्य

93. 'यस्यामतं तस्य मतं, मतं यस्य न वेद सः' इत्युक्तिः कस्याम् उपनिषदि ?
   (A) केनोपनिषदि
   (B) कठोपनिषदि
   (C) ईशोपनिषदि
   (D) तैत्तिरीयोपनिषदि

www.prepp.in

Prepp Your Personal Exams Guide



94. रिक्तस्थानं पूरयत :

तदेव ................. तद् ब्रह्म तदेवामृतम् उच्यते।

(A) शुभ्रं

(B) शुक्लं

(C) शुक्रं

(D) श्वेतं

95. युग्मपर्यायेषु समीचीनं विचिनुत :

(*a*) तेन त्यक्तेन भुञ्जीथाः (*p*) केनोपनिषद्

(*b*) नेदं यदिदमुपासते (*q*) ईशोपनिषद्

(*c*) अतिदीर्घे जीविते को रमेत (*r*) तैत्तिरीयोपनिषद्

(*d*) प्राणो ब्रह्मेति व्यजानात (*s*) कठोपनिषद्

(A) *aq* *bp* *cs* *dr*

(B) *ap* *bq* *cr* *ds*

(C) *ar* *bs* *cp* *dq*

(D) *as* *br* *cq* *dp*

96. अधोनिर्दिष्टेषु योग्यं सत्यासत्यपर्यायं विचिनुत :

(*a*) विद्यां च अविद्यां च यो न वेदो भयं सह

(*b*) ब्रह्मविन्नाप्नोति परम्

(*c*) येन चंक्षूषि न पश्यति

(*d*) वरुणं पितरं नोपससार

(A) सत्यम्, सत्यम्, सत्यम्, सत्यम्

(B) असत्यम्, असत्यम्, असत्यम्, असत्यम्

(C) सत्यम्, असत्यम्, असत्यम्, सत्यम्

(D) असत्यम्, सत्यम्, सत्यम्, असत्यम्

97. अधोनिर्दिष्टेषु समीचीनं युग्मपर्यायं विचिनुत :

(*a*) अनुस्वारस्य ययि (*p*) परसवर्णः

(*b*) प्लुतप्रगृह्या (*q*) अचि नित्यम्

(*c*) विप्रतिषेधे (*r*) अनल्विधौ

(*d*) स्थानिवदादेशः (*s*) परं कार्यम्

(A) *aq* *bp* *cr* *ds*

(B) *as* *bp* *cq* *dr*

(C) *ap* *bq* *cs* *dr*

(D) *ar* *bs* *cp* *dq*

98. केन कठोपनिषद् सम्बद्धा वर्तते ?

(A) कृष्णयजुर्वेदेन

(B) ऋग्वेदेन

(C) शुक्लयजुर्वेदेन

(D) अथर्ववेदेन

99. 'आदित्यः' कस्मात् :

(A) आदत्ते सारम्

(B) आदत्ते रसान्

(C) आदत्ते प्रकाशम्

(D) आदत्ते किरणम्

100. ज्योतिषशास्त्रमाश्रित्य ऋग्वेदस्य कालनिर्णयः केन पाश्चात्यविदुषा कृतः ?

(A) लुई रेनू

(B) मैक्समूलरः

(C) विण्टरनित्जः

(D) जैकोबी

www.prepp.in
Prepp
Your Personal Exams Guide



**ROUGH WORK**

Prepp
Your Personal Exam Guide